क० श्रीकृष्णायनमः चिंतामणिर्जयतिसोमगिरिर्गुरुर्मेशिक्षागु
रुश्चभगवान्शिखिपिच्छमौलिः यत्पादकल्पतरुपल्लव
शेखरेषुलीलास्वयंवररसंलभतेजयश्रीः १ अस्तिस्वस्त
रुणीकराग्रविगलत्कल्पप्रसूनाप्लुतंवस्तुप्रस्तुतवेणुनाद
लहरीनिर्वाणनिर्व्याकुलं स्वस्तस्वस्तनिरुद्धनीविविल्व
सद्गोपीसहस्राहृतंहस्तन्यस्तनतापवर्गमखिलोदारंकि

शोराकृति २ चातुर्य्यैकनिदानसीमचपलापांगच्छटामं
थरंलावण्यामृतवीचिलोलितहृशंलक्ष्मीकटाक्षाहृतंका
लिंदीपुलिनागणप्रणयिनंकामावतारांकुरंवालंनील्न
ममीवयंमधुरिमस्वाराज्यमाराध्मुमः ३ वल्गत्तिंशविलास
कुंतलभरंमाधुर्य्यमग्नाननंप्रोन्मीलन्नवयौवनंप्रविलसद्वे
णुप्रणादामृतं॰ स्रापीनस्तनकुड्मलाभिरभितोगोपीभिरा

क धितंज्योतिश्चितसिनप्रकास्तुजगतांमकाभिरामाद्भुतं ४ मधु
रतरास्मितामृतविमुग्धमुखांबुरुहं मदशिखिपिच्छलांछितम
नाज्ञकचप्रचयं विषयविषामिषग्रसनगृध्रुनिचेतसिमेविपु
लविलोचनंकिमपिधामचकास्तुचिरं ५ मुकुलायमान
नयनांबुजंविभोर्मुरलीनिनादमकरंदनिर्भरं मुकुरायमाण
मृदुगंडमंडलंमुखपंकजंमनसिमेविजृंभतां ६ कमनी

२

य किशोरमुग्धमूर्तेः कलवेणुकणितादृतानेनेंदोः मम
वाचिविजृंभतांमुरारेर्मधुरिमाणः कणिकापिकापिकापि
७ मदशिखंडिशिखंडविभूषणं मदनमंथरमुग्धमुखांबु
जं व्रजवधूनयनांजनरंजितंविजयतांममवाङ्मयजीवितं
८ पल्लवारुणपाणिपंकजसंगिवेणुरवाकुलंफुल्लपाटल
पाटलीपरिवादिपादसरोरुहं उल्लसन्मधुराधरद्युति मंज

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रीसरसाननेवल्लवीकुचकुंभकुंकुमपंकिलेविभुमाश्रये ९
स्मरपांगरेखाभिरभंगुराभिरनंगरेखास्तिरंजिताभिः स्मरु
क्षणंवल्लवसुंदरीभिरभ्यस्यमानेविभुमाश्रयामः १०
हृदयेममहृद्यविभ्रमाणांहृदयंहर्षविशाललोलनेत्रे तरु
णंवृजवालसुंदरीणांतरलेकिंचनधामसन्निधत्तां ११ नि-
खिलभुवनलक्ष्मीनित्यलीलास्पदाभ्यांकमलविपिनवीथी

गर्वसर्वंकषाभ्यां प्रणामदमयदानपेोढिगाढादृताभ्यांकिमपिवहु
तुचेतःकृष्णपादांबुजाभ्यां १२ प्रणयपरिणताभ्यांश्रीनरालंब
नाभ्यांप्रतिपदललिताभ्यांप्रत्यहंनूतनाभ्यां प्रतिमुकुरधिका
भ्यांप्रस्फुरल्लोचनाभ्यांप्रवहतुहृदयेनःप्राणनाथः किशोरः १३
माधुर्य्यवारिधिमदांबुतरंगभंगीशृंगारसंकुलितशीतकिशोरवेषं
स्मामंदहासललितानननंद्विवमानंदसंभवमनुभवतांमनोमे
१४ स्मव्याजमंजुलमुखांबुजमुग्धभावैरास्वाद्यमाननिजवेणु

विनोदनादं स्माक्रीडतामरुणपादसरोरुहाभ्यामार्द्रमदीयहृद
येभुवनार्द्रमोजः १५ मणिनूपुरवाचालंवंदेतच्चरणं विभोः
ललितानियदीयनिलक्ष्माणिव्रजवीथिषु १६ ममचेतसिस्फु
रतुवल्लवीविभोर्मणिनूपुरपरिणायिमंजुशिंजितं कमलावनेच
रकलिंदकन्यकाकलहंसकंठकलकूजितादृतं १७ तरुणा
रुणकरुणामयविपुलायतनयनंकमलाकुचकलसीभरवि
पुलीकृतपुलकं मुरलीरवतरलीकृतमुनिमानसनलिनंम ४

मरवेलतुमदचेतसिमकराधरममतं १८ स्मामुग्धमर्द्धनयनांबु
जचुंब्यमानहर्षाकुलव्रजवधूमकरानेनेंदोः स्मारखेवेणुरव
मातकिशोरमूर्त्तेराविर्भवंतुममचेतसिकेपिभावाः १९ क
लक्वणितकंकणंकरनिरुद्धपीतांवरंक्रमपस्रतकुंतलंग
लितबर्हभूषंविभोः पुनःप्रकृतिचापलंप्रणायिनीभुजायं
त्रितंममस्फुरतुमानसेमदनकेलिशय्योत्थितं २०

स्तोकस्तोकनिरुद्धमानमृदुलप्रस्यंदिमंदस्मितंप्रेमोद्भेदनिरर्गलप्रस्मरप्रव्यक्तरोमोद्गमं श्रोतुंश्रोत्रमनोहरं व्रजवधूलीलामिथोजल्पितंमिथ्याञ्चापमुपास्महेभगवतः क्रीडानिमिलदृशः २१ विचित्रपत्रांकुरशालिवालास्तनांतरंयामवनांतरंवा स्मपास्यवृंदावनपादलास्यमुपास्यमन्यंनविलोकयामः २२ सार्द्धंसमृद्धैरमृतायमानैर्गतायमानैर्मुरलीनिनादैः मूर्द्धा

५

भिषिक्तंमधुराकृतीनांवालंकदानामविलोकयिष्ये २३ शि शिरीकुरुतेकदानुनःशिखिपिंछाभरणः शिशुर्दृशोः युगलं विगलन्मधुद्रवस्मितमुद्रामृदुनामुखेंदुना २४ कारुण्य कर्बुरकटाक्षनिरीक्षणेन तारुण्यसंवलितशैशववैभवेन स्वापुष्णतामुवनमद्भुतविभ्रमेणश्रीकृष्णचंद्र शि शिरीकुरुलोचनेमे २५ कदावाकालिंदीकुवलयदलश्यामतरलाःकटा

ह्यालङ्घंतेकिमपिकरुणावीचिनिचिताः कदावाकंदर्पप्रतिभटज
टाचंद्रशिशिराः कमप्यंतस्तोषंदधतिमुरलीकेलिनिनदाः २६
प्रधीरमालोकितमार्द्रजल्पितंगतंचगंभीरविलासमंथरं प्रमेद
मालिंगितमाकुलोन्मदस्मितंचतेनाथविदंतिगोपिकाः २७
प्रस्तोकस्मितभरमायताय़ताक्षंनिःशेषस्तनमृदितंव्रजांगनाभिः
निःसीमस्तवकितनीलकांतिधारंदृश्यासंत्रिभुवनसुंदरंमहस्ते

२८ मयिप्रसादंमधुरैःकटाक्षैर्वशीनिनादानुचरैर्विधेहि
त्वयिप्रसन्नेकिमिहापरैर्नस्त्वय्यप्रसन्नेकिमिहापरैर्नः २९
निवृद्धमूर्द्धांजलिरेषयाचेनिरंधदैन्यान्नतिमुक्तकंठं दृशंवु
धेदेवभवत्कटाक्षदाक्षिराय़त्नेशनसकृन्निषिंच ३०
पिंछावतंसरचनोचितकेशपाशेपीनस्तनीनय़नपंकजपूज
नीय़े चंद्रारविंदविजयोद्यतवक्त्रविंवेचापल्यमेतिमय़नंतव

शेशवेन ३१ त्वच्छैशवंत्रिभुवनाद्भुतमित्यवेहि मच्चापलंच
तववामभवाधिगम्यं तत्किंकरोमि विरलंमुरलीविलासि
मुग्धंमुखंवुजमुदीक्षितुमीक्षणाभ्यां ३२ पर्य्याचितामृ
तरसानिपदार्थभंगीवल्गूनिवल्गितविशालविलोचनानि
वाल्याधिकानिमदवल्लवभाविनीभिर्भोक्तुंतिरुक्तांत
वजल्पितानि ३३ पुनःप्रसन्नेंदुमुखेनतेजसापुरोवतीर्य

स्यकृपामहांबुधेः तेदेवलीलामुरलीरवामृतंसमाधिवि घ्वा
यकदानुमेभवेत् ३४ वालेनमुग्धचपलेनविलोचनेन
मन्मानसेकिमपिचापलमुद्वहंतं लोलेनलोचनरसायन
मीक्षणेनलीलाकिशोरमुपगूहितमुत्सुकाःस्म ३५
न्यधीरविंबाधरविभ्रमेणहर्षादिवेणुस्वरसंपदाच न्येनेन
केनापिमनोहरेणाहाहंताहाहंतमनोभुनोषि ३६

यावन्नमे निखिलमर्मदृढाभिघातं निःसंधिबंधनमपैति स
कोपितापः तावद्विनोभवतुतावकवक्त्रचंद्रचंद्रातपद्वि
गुणिता ममचित्तधारा ३७ यावन्नमेनरदशादशमी
कुतोऽपिरंध्रादुपैतितिमिरीकृतसर्वभावा लावण्यकेलि
सदनंतवतावदेवलक्ष्यासमुत्कणितवेणुविनोदनादं
३८ स्यालोललोचनविलोकितकेलिधारानीराजिताग्र ८

चरणोःकरुणंवुरणोः स्यादाणिवेणुनिनदैःप्रतिनादपूरैराकर्णया
मिमणिनूपुरझिंजितानि ३९ हेदेवहेदयितहेभुवनैकबंधोहे
कृष्णहेचपलहेकरुणैकसिंधो हेनाथहेरमणहेनयनाभिराम
हाहाकदानुभवितासिपदंहशोर्मे ४० स्यमूल्यधन्यानिदिनां
तरणिहरेत्वदालोकनमंतरेण स्यनाथवंधोकरुणैकसिं
धोहाहंतहाहंतकथंनयामि ४१ किमिहकरणमःकस्यवू

मःकृतंकृतमाशयाकथयतकथामन्योधन्यामहोहृदयेशयः
मधुरमधुरस्मेराकोरमनोनयनोत्सवेकृपणाकृपणाकृस्मित
स्माचिरंवतलंवते ४२ स्राभ्यांविलोचनाभ्योमंकुरुहविलो
चनेवालं स्राभ्यामपिपरिरब्धुंदूरेममहंतदेवसामग्री ४३
स्रस्तांतस्मितमरुणाधरोष्ठहर्षोद्विगुणोवेणुमनोज्ञगीतं
विभ्राम्यद्विपुलविलोचनाद्विमुग्धंश्लिष्यतववदनांबुजंक ९

दानु ४४ लीलायताभ्यांरसप्रीतलाभ्यांनीलारुणाभ्यांनय
नांबुजाभ्यां स्रालोकेयदद्भुतविभ्रमाभ्यांकालेकदाकारु
णिकःकिशोरः ४५ वहलचिकुरभारंबद्धपिंछावतंसंच
पलचपलनेत्रंचारुविंबाधरोष्ठं मधुरमृदुलहासंमंदरोदा
रलीलंमृगयतिनयनंमेमुग्धवेषंमुरारेः ४६ वहलजलद
छायाचीरंविलासभरालसंमदशिखिशिखालीलांतसंमेल

ज्ञमुखांबुजे कमपिकमलापांगीदृग्वपुसंगजडुंजगन्मधु
रिमपरिपाकोद्रेकंवयंमहे ॥४७॥ परामृश्यंदूरपथि
पथिमुनीनांव्रजवधूदृशादृश्यंशश्वत्त्रिभुवनमनोहारिवद
नं स्वनामश्रुत्यंवाचामुनिसमुदयानामपिकदादरिदृश्य
देवंदरदलितनीलोत्पलरुचिं ॥४८॥ लीलाननांबुजमधी
रमुदीक्षमाणंनमोशिवेशुविवरेषुनिवेशयंतं दोलायमा

ननयनंनयनाभिरामंदेवंकदानुदयितंव्रतिलोकयिष्ये ॥
४९॥ लग्नंमुहुर्मनसिलंपटसंपदायलेखावलेहिनिरस
ज्ञमनोज्ञवेषं रंजन्मृदुस्मितमृदूल्लसिताधरांशुरांकेंदुलालि
तमुखेंदुसुकुंदवाल्यं ॥५०॥ स्मरहिमकरकरनिकरमृदुमुदि
तलक्ष्मीसरसतरसरसिरुहमरंदशीदेवे । व्रजयुवतिरतिक
लहविजयिनिजलीलामदमुदितवदनशशिमधुरिमशीली

LIBRARY

ये ५१ करकमलदलकलितललिततरवंशीकलनिनदगल
दमृतघनसरसिदेवे सहजरसभरभरितदरहसितवीथीसत
वहदधरमणिमधुरिमणिलीये ५२ कुसुमसरशरसमरकु
पितमदगोपीकुचकलसघुसृणरसलसदुरसिदेवे मदमुदि
तमृदुहसितमुषितपूर्णशिशोभामुकुरधिकमुखकमलमधुरि
मणिलीये ५३ स्मानमामसितभ्रुवोरुपचितामक्षीणपे

११

स्मांकुरेष्वालोलामनुरागिणोर्नेयनयोरार्द्रांमृदोज्जल्पिते
स्मातामन्मधरामृतेमदकलामम्लानवंशीस्वनेष्वाप्तास्तिमम
लोचनंव्रजशिशोर्मूर्तिंजगन्मोहिनी ५४ तत्कैशोरतच्चव
क्रारविंदंतत्कारुण्यंतेचलीलाकटाक्षाः तत्सौंदर्य्यंसाचसा
द्वस्मितश्रीःसत्यंसत्यंदुर्ल्लभंदेवतेऽपि ५५ विश्वोपप्लवशा
मनेकवद्धदीक्षेविश्वासस्तवकितचेतसांजनानां पश्याम

प्रतिनवकांतिकंदलादुपश्यामःपथिपथिशेशवंमुरारेः पृ६
मौलिस्रंडकभूषणंमरकतस्तंभाभिरामंवपुर्वक्त्रेचित्रविमुग्ध
स्मेरमधुरंबालेविलोलेक्षणं वाचःशैशवशीतलामदगजस्फा
घ्याविलासस्थितिर्मंदंमंदमयेकयेषमथुरावीथीमियोगाहते पृ७
पादौवादविनिर्जितांबुजवनौपद्मालयालंवितौपाणीवेणुविनोदन
श्रमणयिनोपर्याप्तशिल्पश्रियौ वाहुदोहदभाजनंमरगदशांमाधुर्य
१२

धारा किरीवक्त्रंवा विषयाभिलंघनमहोवालंकिमेतन्महः पृ८ स्मेर
न्नामविभूषणंवहुमतंवेशाग्रशेषैरलंवक्त्रंद्वित्रिविशेषकांतिलहरी
विन्यासधन्याधरं शिल्पैरल्पधियामगम्यविभवैःशृंगारभंगीमयं
चित्रंचित्रमहोविचित्रमहहोचित्रंविचित्रंमहः पृ९ स्प्रेस
मग्रयतिकामपिकेलिलक्ष्मीमन्यासुदिक्षुपिविलोचनेमे
वसाक्षि हाहंतद्दस्तपथदूरमहोकिमेतदाशाकिशोरम

यमंबुजगञ्जयंमे ६० चिकुरंबहलंविरलंभ्रमरंमृदुलंवचनंवि
पुलंचयनं स्मरंमधुरंवदनंमधुरं चपलंचरितंचकदानुवि
भोः ६१ परिपालयनः कृपालयेत्यसकृज्ज्वलितमानसेबोध
वः मुरलीमृदुलस्वनांतरे विमुराकर्णयिकदानुनः ६२
कदानुकस्यांनुविपद्दशायांकेशोरगंधिः करुणांबुधिर्नः
विलोचनाभ्यांविपुलायताभ्योमालोकयिष्यन्विषयीक

१३,

रोति ६३ मधुरमधरबिंबेमंजुलंमंदहासेशिशिरमसृतना
देशीतलंदृष्टिपाते विपुलमरुणनेत्रेविश्रुतंवेणुनादे
मरकतमणिनीलंबालमालोकयेनु ६४ माधुर्याद्यपि
मधुरं मन्मथतातस्यकिमपिकैशोरं चापल्याद्यपिचपलं
चेतोवतरतिहृतकिंकुर्मः ६५ वक्षस्थलेचविपुलंन
यनात्पलेचमंदस्मितेचमृदुलंमदजल्पितेच विंबाधरेच

मधुरंमुरलीरवेचवालंविलासनिधिमाकलयेकदानु ६६
ग्धार्द्रावलोकितधुरापरिनद्धनेत्रमाविःकृतस्मितसुधामधुरा
धरोष्ठं ग्राद्यंपुमांसमवतंसितवर्हिवर्हमालोकयंतिकृतिन
कृतपुण्यपुंजाः ६७ मारःस्वयंनुमधुरद्युतिमंडलेनुमाधु
र्य्यमेवनुमनोनयनामृतांनु वेणीमृजोनुममजीवितवल्ल
भोनुवालोऽयमभ्युदयतेममलोचनाय ६८ वालोयंमा

लोलविलोचनेनवक्त्रेण चित्रीकृतदिङ्मुखेन वेषेणघोषो
चितभूषणेनमुग्धेनदुग्धेनमनोभवेनः ६९ ग्रांदोलिताग्र
मुजमाकुललोलनेत्रमाईस्मिताईवदनेंदुसंदोहं शि
जानभूषणेचितंशिखिपिछमौलिशीतंविलोचनरसायन
मभ्युपैति ७० पशुपालबालपरिषद्विभूषणाः शिक्षुरेषशी
तलविलोलविलोचनः मृदुलस्मिताईवदनेंदुसंपदोमद

ग़न्मदीयहृदयंविगाहते ७१ किमिदमधुरवीथिकूप्रवंशीनि
नादंकिरतिनयनयोनैःकामपिप्रेमधारां तदिदमम्रवीथि
दुर्लभंवल्लभंनस्त्रिभुवनकमनीयंदैवतंजीवितंच ७२ तदि
दमुपनतंतमालनीलंतरलविलोचनतारकाभिरामं मुदि
तमुदितवक्त्रचंद्रबिंबंसुखरितवेणुविलासिजीवितंमे ७३
चापल्यसीमचपलानुभवैकसीमचातुर्य्यसीमचतुराननशि

ल्पसीम सौरभ्यसीमसकलाद्भुतकेलिसीमसौभाग्यसीमत
देवजभाग्यसीम ७४ माधुर्य्यसीद्विगुणाश्लिशिरंवक्त्रचंद्रं व
हंतीवेणीवीथीविगलदमृतश्रोतसासेचयंती मद्वाणीनांवि
हरणपदंमत्तसौभाग्यभाजांमत्पुण्यानांपरिणतिरहोनेत्र
योःसन्निधत्ते ७५ तेजसेऽस्तुनमोधेनुपालिनेलोकपालि
ने राधापयोधरोत्संगशायिनेशेषशायिने ७६ धेनुपाल

दयितास्तनस्थलीधन्यकुंकुमसनाथकांतये वेणुगीतगतिमूलवेधसे
ब्रह्मराशिमहसेनमोनमः ७७ मदुक्वणन्नूपुरमंथरेण वालेन
पादांबुजपल्लवेन स्वतस्मरन्मंजुलवेणुगीतमायातिमेजीवितमं
त्रकेलिः ७८ सोयंविलासस्मुरलीनिनदामृतेनसिंचन्नुदंचि
तमिदंममकर्मयुग्मं स्यायातिमेनयनवंधुरनर्मवंधोरानंदकंद
लितकेलिकटाक्षलक्ष्मीः ७९ दूराद्विलोकयतिवारणकेलि

गामीधाराकटाक्षभरितेनविलोकितेन स्मारादुपेतिहृदयंगम
वेणुनादवेणीमुखेनदृशांप्रभेरणदेवः ८० त्रिभुवनस्तरसा
भ्यांदिव्यलीलाकुलाभ्यांदिशिदिशितरलाभ्यांहस्तभूषादराभ्यां
स्वशरणशरणाभ्यामद्भुताभ्यांपदाभ्यामयमयमनुकूजद्वेणुरा
यातिदेवः ८१ सोयंमुनीद्रजनमानसतापहारीसोयंमदव्रजवधू
वसनापहारी सोयंत्रतीयभुवनेश्वरदर्पहारीसोयंमदीयहृदयं

वुरुहापहारी ८२ सर्वज्ञत्वेनमोग्धेनसार्वभौममिदंमहः निर्वि
शन्नयनंहंतनिर्वाणपदमश्नुते ८३ युष्मानमितत्पुनरु
क्तशोभामुल्लेतरांशोरुदयान्मुरेंदोः तत्मांवुराशिंद्विगुणी
करोतिकुल्मोद्वयंकिंचनजीवितंमे ८४ तदेतदाताम्रविलो
चनश्रीसंभावितांशेषविनम्रगर्वं मकुंमुरारेर्मधुराधरोष्ठंमुखं
वुजंचुंवतिमानसंमे ८५ करोशरदिजांवुजक्रमविलासशि ७७

स्रागुरुमंदोविवुधपादपपृथमपल्लवोल्लंघिनो दृशोदलित
दुर्मदेत्रिभुवनोपमानश्रियोविलोकयविलोचनामृतमलोम
रुःशेषवं ८६ म्राचिन्वानमरुन्यरुन्यरुनिसार्करान्विहार
क्रमानारुंधानमरुंधुतीरुदयमप्यादृस्मितादृश्रिया म्रातन्वो
नमनन्यजन्मनयनश्लाघ्यमनर्घ्यादृशामानंदंवृजसुंदरी
स्तनतटीसाम्राज्यमुज्जृंभते ८७ तदुच्छ्वसितयौवनंतरल

शेशवालंकृतंमदस्फुरितलोचनंमदनमुग्धहासामृतं प्रतिक्ष
णाविलोभनंप्रणयपीतवंशीमुखंजगत्त्रयमनोहरंजयतिमा
मकंजीवितं ॥८८॥ चित्रंतदेतच्चरणारविंदं चित्रंतदेतद्वदना
रविंदं ॥ चित्रंतदेतन्नयनारविंदं चित्रंतदेतद्वपुरस्यचित्रं
८९ ॥ अखिलभुवनैकभूषणामधिभूषितजलधिदुहित्कु
चकुंभं व्रजयुवतिहारवल्लीमरकतनायकमहामणिंवंदे

॥९०॥ कांताकुचग्रहणविग्रहलब्धलक्ष्मीखंडांगरागलव
रंजितमंजुलश्रीः ॥ गंडस्थलीमुकुरमंडलखेलमानघर्मांकु
रः किमपिगुंफतिकर्मदेवः ॥९१॥ मधुरंमधुरंवपुरस्यवि
भोर्मधुरंमधुरंवदनंमधुरं ॥ मधुगंधिमृदुस्मितमेतदहोमधु
रंमधुरंमधुरंमधुरं ॥९२॥ शृंगाररससर्वस्वंशिखिपिंछविभू
षणं ॥ अंगीकृतनराकारमाश्रयेभुवनाश्रयं ॥९३॥ नाद्यापि

पश्यतिकदानिदर्शनायचित्तेतथोपनिषदांसुदृशांसहस्रे सत्वेचिरा
न्नयनयोरनयोःपदव्यांस्वामिन्कदानुकृपयाममसन्निधत्से ९४
कियत्कांतिःकेशवत्वन्मुखेंदोःकोयंवेषःकापिवाचामभूमिः
सयंसोयंस्वादतामंजलिस्तेभूयोभूयोभूयसस्त्वांनमामि ९५
वदनेंदुविनिर्जितःप्रशीदशधादेवपदंपपद्यते अधिकांश्रियं
मश्नुतेतरांतवकारुण्यविजृंभितंकियत् ९६ तत्वन्मुखंकथं

मिवांबुजतुल्यकक्षंवाचामवाचिनमुपर्वणिपर्वणींदोः तत्किं
ब्रुवेकिमपरंभुवनैककांतवेणुत्वदाननमनेनसमंनुयत्स्या
त् ९७ शुश्रूषेशृणुयद्विप्रणिधानपूर्वंपूर्वैरपूर्वकवि
भिर्निकटाङ्कितंयत् नीराजनक्रमधुराभवदाननेंदोर्निर्व्या
जमर्हतिचिरायशशिप्रदीपः ९८ अखंडनिर्वाणरसंवा
हैर्विखंडिताशेषरसांतराणि अयंत्रितोद्दामसुधानिवानि

जयंतिशीतानितवस्मितानि ९९ कामंसंतुसदृशाः कतिपय
येसारस्यधोरेयकाः कामंवाकमनीयतापरिमलस्वाराज्यव
द्भवृताः नैवेवंविवदामहेनचपुनर्देवप्रियंबुमहेयत्सत्यंक
मनीयतापरिणतिस्त्वय्येवपारंगता १०० गलद्वीडालोला
मदनविनतागोपवनितामदस्फीतंवीतंकिमपिमधुराचापल
धुरांसमुज्जृंभागुंफामधुरिमकिरंमादृशगिरांत्वयिस्थानेजातेद २०

धतिचपलंजन्मसफलं १०१ भवनंभुवनंविलासिनीश्रीस्तनयस्ता
मरसासनःस्मरश्च परिवारपरंपराःस्तुरेद्वास्तदपित्वच्चरितंवि
भोविचित्रं १०२ देवस्त्रिलोकीसौभाग्यकस्तूरीमकरांकुरः
जीयाद्भृंगानंगकेलिलालितविभ्रमः १०३ प्रेमदंचमेका
मदंचमेवेदनंचवैभवंचमे जीवनंचमेजीवितंचमेदेवतंचमेदे
वनापरं १०४ माधुर्य्यणाविवृद्धितांवाचोनस्तवेवैभवे चापल्ये

नविवर्द्धंतांचिंतानस्तवेशेशवे १०५ यानित्वच्चरितामृतानिरस
नालेह्यानिधन्यात्मनांयेवाशैशवचापलव्यतिकरारब्धावरोधो
न्मुखाः यावाभावितवेणुगीतगतयोलीलामुरवांभोरुहे धारा
वाहिक्रयावहंतुहृदयंतान्यवतान्यवंमे १०६ भक्तिस्त्वयिस्थि
रतरामगवन्यदिस्याद्देवेननःफलतिदिव्यकिशोरमूर्त्तिः
मुक्तिःस्वयंमुकुलितांजलिसेवतेऽस्मान्धर्मार्थकामगतयःस

LIBRARY OF THE

मयप्रतीक्षाः १०७ जयजयजयदेवदेवदेवत्रिभुवनमंगल
दिव्यनामधेय जयजयजयदेवकृष्णदेवश्रवणमनोनयना
मृतावतार १०८ तुभ्यंनिर्भरहर्षवर्षविवशीवशस्फुटावि
र्भवद्भूयश्चापलभूषितेषुस्तुकृतीभावेषुनिर्भीसिने श्रीम
ज्जोकुलमंडनायमनसांवाचांचदूरेस्फुरन्माधुर्य्यैकमहाशी
वायमहसेकसेचिदसेनमः १०९ ईशानदेवचरणाभ

रोननीवीदामोदरस्थिरयशःस्तवकोड्डमेन लीलाशुकेन
रचितंतवकृष्णदेवकर्णामृतंबहुतकल्पशतांतरेपि ११०
धन्यानांसरसानुल्लापलहरीसौरभ्यमभ्यस्यतांकर्णानांवि
वरेषुकामपिसुधावृष्टिंदुहानंमुहुः वन्यानांसुहृशांमनोन
यनयोर्मग्नस्यदेवस्यनःकर्णानांवचसांविजृंभितमहोकृष्ण
स्यकर्णामृतं १११ अनुग्रहद्विगुणविशाललोचनैरनुस २२.

रन्मदुमुरलीरवामृतैः यतोयतःप्रसरतिमेचिलोचनंततस्त
तःस्फुरतुतवैववैभवं ११२ इतिश्रीविल्वमंगललीला
शुकरचितंश्रीकृष्णकर्णामृतस्तोत्रंसंपूर्णं ०
श्रीकल्याणपुरीमध्येश्रीमन्मदनमोहनदेवस्यदेवाल
येलिखितंश्रीजयकृष्णदासाख्यनं पठनार्थंश्रीकाकुचर
णदासस्येति ० शुभमस्तुपठनार्थिनः ० ०

23

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017